श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ मङ्गळाशासनम् ॥

लक्ष्मीचरण लाक्षाङ्कसाक्षिश्रीवत्सवक्षसे।
क्षेमङ्कराय सर्वेषां श्रीरङ्गेशाय मङ्गळम्॥ १ ॥

श्रियःकान्ताय कल्याण निधये निधयेऽर्थिनाम्।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गळम्॥ २ ॥

अस्तु श्रीस्तनकस्तूरी वासना वासितोरसे।
श्रीहस्तिगिरि नाथाय देवराजाय मङ्गळम्॥ ३ ॥

कमलाकुच कस्तूरी कर्दमाङ्कित वक्षसे।
यादवाद्रि निवासाय संपत्पुत्राय मङ्गळम्॥ ४ ॥

नीलाचल निवासाय नित्याय परमात्मने।
सुभद्रा प्राणनाथाय जगन्नाथाय मङ्गळम्॥ ५ ॥

स्वोच्छिष्ट मालिकाबन्ध गन्धबन्धुर जिष्णवे।
विष्णुचित्त तनूजायै गोदायै नित्यमङ्गळम्॥ ६ ॥

श्रीनगर्यां महापुर्यां ताम्रपर्ण्युत्तरे तटे।
श्री तिन्त्रिणी मूलधाम्ने शठकोपाय मङ्गळम्॥ ७ ॥

शेषो वा सैन्यनाथो वा श्रीपतिर्वेति सात्त्विकैः।
वितर्क्याय महाप्राज्ञैर्भाष्यकाराय मङ्गळम्॥ ८ ॥

तुला मूलावतीर्णाय तोषिताखिलसूरये।
सौम्यजामातृमुनये शेषांशायास्तु मङ्गळम्॥ ९ ॥

मङ्गळाशासनपरैः मदाचार्य पुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गळम्॥ १० ॥

॥ इति मङ्गळाशासनं सम्पूर्णम् ॥



www.prapatti.com